वेदाः षड़ङ्गसहिताः ब्रह्मव्याख्यानतत्पराः ।
न्यायेन सार्द्धं मीमांसा ब्रह्म निर्णीयते ध्रुवम् ॥
ब्रह्मज्ञाने तु जीवस्य परमात्मविचारणम् ।
धर्म्मशास्त्रानुसारेण व्यवस्थादिर्निरूपितः ॥
पुराणाख्यानि तेनैव जायते सततं प्रिये ! ।
ब्रह्मानन्दपरो जीव आत्मसंरक्षणोत्सुकः ॥
आयुर्व्वेदं धनुर्व्वेदं गान्धर्व्वञ्च समभ्यसेत् ।
अनुसन्धानतो देवि पूर्णज्ञानी च साधकः ॥
मधुनेक्षुरसेनैव दुग्धादिफलशस्यकैः ।
गन्धमाल्यादिना देवि ! वस्त्रालङ्करणादिना ॥
शय्यायां वनितारूपं पूजयेज्जगदम्बिकाम् ।
वनितापूजने देवि ! शृङ्गारो रससाधनम् ॥
पूजनं कर्म्मकाण्डञ्च पञ्चधा तत्प्रकीर्त्तितम् ।
तत्सर्व्वं साधयेद्वीरो देवी सम्प्राप्तिहेतवे ॥
पूजने नवधा भक्ती रसोल्लासश्च जायते ।
तदा योगं समभ्यस्य समाधिस्थो भवेद्यतिः ॥
अतएव महेशानि ! पुरैव कथितं मया ।
अनुभूय रसान् सर्व्वान् पञ्चपञ्चाशतः प्रिये ! ॥
विषये कर्म्मकाण्डेषु निष्कामी भवति प्रिये ! ।
निष्कामे फलमाश्चर्य्यं तेन तुष्यति देवता ॥
देही देहं समाश्रित्य न च कर्म्म परित्यजेत् ।
दिव्यां क्रियां समाप्यैवं देवीयात्रादिकर्म्मणा ॥
पूर्णज्ञानरसानन्दात् जीवन्मुक्तो भवेद्ध्रुवम् ॥”
इति वामकेश्वरतन्त्रे चतुःपञ्चाशत् पटलः ॥
रसस्य परब्रह्मस्वरूपत्वमप्युक्तम् । यथा,—
“रसो वै सः ।” इति श्रुतिः ॥ सन्ध्यामन्त्रेऽपि ।
“आपो ज्योती रसोऽमृतं ब्रह्म ।” अत्र ब्राह्मण-
सर्व्वस्वे हलायुधः । “स एव ब्रह्मरूपो भर्गो रसः
तृणवृक्षौषध्यादिषु स्थावरेषु च स एव रस-
रूपेण वसतीत्यर्थः । तथा च योगियाज्ञ-
वल्क्यः ।
“वृक्षौषधितृणानाञ्च रसरूपेण तिष्ठति ॥”
श्रीमद्भगवद्गीतायामपि ।
“रसोऽहमप्सु कौन्तेय इति ।”)
विषम् । (यथा, मुद्राराक्षसे २ अङ्के ।
“ये मन्त्रेषु रसेषु च प्रणिहितास्तैरेव ते
घातिताः ॥”)
वीर्य्यम् । गुणः । रागः । ( यथा,—
“कविता कोमलवनिता
रसयति रसिकं रसेन मिलिता ।
सा यदि दुर्ज्जनहस्ते
पतिता प्रतिपदभग्ना संशयमग्ना ॥”
इत्युद्भटः ।)
द्रवः । इत्यमरः । ३ । ३ । २२६ ॥ गन्धरसः ।
( तत्पर्य्यायो यथा,—
“विद्वान् गोलः पिण्डकश्च पिण्डो वोलो रसो
रसः ॥”)
जलम् । ( यथा, रघौ । १ । १८ ।
“प्रजानामेव भूत्यर्थं स ताभ्यो वलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥” )
पारदः । इति मेदिनी ॥ ( “तत्र रसप्राधान्य-
माह ।

अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः ।
क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः ॥
साध्येषु भेषजं सर्व्वमीरितं तत्त्ववेदिना ।
असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते ॥
हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः ।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥”
अथ रसपर्य्यायमाह ।
“रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः ।
शिवतेजो रसः सप्त नामान्येवं रसस्य तु ॥”
मतान्तरम् ।
“शिववीजं रसः सूतः पारदश्च रसेन्द्रकः ।
एतानि रसनामानि तथान्यानि यथा शिवे ॥”
यथा शिवे इत्यनेन शिवपर्य्यायाणामपि रस-
वाचकत्वम् ॥ * ॥ अथ रसलक्षणम् ।
“अन्तः सुनीलो वहिरुज्ज्वलो यो
मध्याह्नसूर्य्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डरश्च
चित्रो न योज्यो रसकर्म्मसिद्धौ ॥
नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः ।
असह्याग्निर्महादोषा निसर्गाः पारदे स्थिताः ॥
व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम् ।
मरणं जड़तां स्फोटं कुर्व्वन्त्येते क्रमान्नृणाम् ॥
तस्माद्रसस्य संशुद्धिं विदध्याच्छिवजां वरः ।
शुद्धोऽयममृतं साक्षाद्दोषयुक्तो रसो विषम् ॥”
“शतं पञ्चाशतं वापि पञ्चविंशद्दशैव च ।
पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव च ॥
कर्षान्न्यूनो न कर्त्तव्यो रससंस्कार उत्तमः ।
प्रयोगेषु च सर्व्वेषु यथालाभं प्रकल्पयेत् ॥
शुभेऽह्नि विप्रं परिचिन्त्य कुर्य्यात्
सम्यक्कुमारीवटुकार्च्चनञ्च ।
सुलोहपाषाणसमुद्भवेऽस्मिन्
दृढ़े च वेदाङ्गुलिगर्भमात्रे ॥
सुतप्तखल्वे नियमन्त्रयुक्तां
विधाय रक्षां स्थिरसारबुद्धिः ।
अनन्यचित्तः शिवभक्तियुक्तः
समाचरेत् कर्म्मरसस्य तज्ज्ञः ॥”
“अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्ते रुद्ररूपिभ्यः ॥”
इति रक्षामन्त्रः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे । विस्तृतविवृतिरस्य पारदशब्देऽभिहिता ॥
शिलारसः । तत्पर्य्यायो यथा,—
“कपिनामा कपितैलं कृत्रिमं कपिलश्चलः ।
तुरुष्को मुक्तिमुक्तश्च पिण्डातैः सिह्लको रसः ॥”
हिङ्गुलम् । तत्पर्य्यायो यथा,—
“रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥”
इति वैद्यकरत्नमालायाम् ॥ )
रसकः, पुं, ( रस+संज्ञायां कन् । ) निष्क्वाथ-
मांसः । इति हेमचन्द्रः । ३ । ७७ ॥
रसकर्पूरं, क्ली, कर्पूररसः । रसकापूर इति
भाषा । यथा, “तत्र पारदस्य संक्षिप्तं शोधनं
कर्त्तव्यम् ।
शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः ।
इष्टिकां खटिकां तद्वत् स्फुटिकां सिन्धुजन्म च ॥
वल्मीकक्षारलवणं भाण्डरञ्जकमृत्तिकाम् ।
सर्व्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत् ॥
खटिका खड़ी । स्फुटिका फिट्करी । सिन्धु-
जन्म सैन्धवम् । वल्मीकं तन्मा मृत् । वल्मीक
वरउर । क्षारलवणं खारीलवण । भाण्डरञ्जक-
मृत्तिका कावितमाटी ।
एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्द्दितम् ।
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् ॥
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्
समाम् ।
सवस्त्रकुट्टितमृदा मुद्रयेदुभयोर्म्मुखम् ॥
संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत् ।
सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नाद्दहनिंशम् ॥
शनैरुद्धारयेद्यन्त्रमूर्द्ध्वस्थालीगतं रसम् ।
कर्पूरवत् सुविमलं गृह्णीयाद्गुणवत्तरम् ॥
तं देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम् ।
खादन् हरति फिरङ्गं व्याधिं सोपद्रवं सपदि ॥
विन्दति वह्निदीप्तिं पुष्टिं वीर्य्यं बलं विपुलम् ।
रमयति रमणीशतकं रसकर्पूरस्य सेवकः
सततम् ॥”
इति भावप्रकाशः ॥ * ॥
अपि च ।
“गैरिकतुवरीखटिकासैन्धवगड़जं रजं कुड़वम् ।
प्रत्येकं दृढ़हण्डामाधायास्योपरि शतं स्थाप्यः ॥
कुड़वमितोऽथ तदूर्द्धं देया हण्डीतदास्य पात-
सुखी ।
अथ तत्सन्धिर्म्मुद्रा लता तदधो हुताशनो
ज्वाल्यः ॥
चर्म्मणषट्कप्रमितैर्दारुभिरनुनातिदुर्व्वलस्थूलैः ।
अग्निं क्रमेण दद्याद्गुरुदग्धिं तवत्मंना द्विनिशम् ॥
तदनु ततो यन्त्रवराद्युक्त्या कर्पूरसन्निभं सूतम् ।
आदाय काचकुम्भे निधाय नवसादरं दद्यात् ॥
संमर्द्य चाथ काष्ठैरर्द्धाम्मेणसंमितैः पचेत् पचम् ।
चुल्लीकमरकमध्यं वितस्तिचतुराङ्गुलावकाशन्तु ॥
कर्त्तव्यं क्रमदहन तदधः प्रज्वालयेन्मध्यम् ।
शशिधवलसुपरिलग्नं युक्त्या संगृह्य रक्षयेद्-
यत्नात् ॥
वल्लं वल्लार्द्धं वा गुड़ेन जीर्णेन रोगिणे दद्यात् ।
दुग्धोदनन्तु पथ्यं देयं तस्मै च ताम्बूलम् ॥
हरति समस्तं रोगं कर्पूराख्यो रसो नृणाम् ॥
फिरङ्गकरिकेशरी सकलकुष्ठदावानलो-
ऽखिलव्रणविनाशकृत् व्रणजगर्त्तपूर्त्तिप्रदः ।
सुवर्णसमवर्णकृत् वलहुताशतेजस्करः
समस्तगदतस्करो रसपतिः स कर्पूरकः ॥”
ग्रन्थान्तरम् ।
“टङ्कणं मधु लाक्षाच ऊर्णा गुञ्जायुतो रसः ।
मर्द्दयेत् भृङ्गजद्रावैर्द्दिनैकं भावयेत् पुनः ।
जातो भस्मत्वमाप्नोति शुद्धकर्पूरसन्निभः ॥